# नवदशः पाठः

# हट्टभ्रमणम्

(पत्रवाहकः द्वारविद्युद् घण्टिकां वादयति। विभुः द्वारम् उद्घाटयति। पत्रवाहकात् पत्रं गृहीत्वा पितरं प्रसन्नतया सूचयति– पितः! पितः! मम मित्रं गिरिराजस्य पत्रमिदम् आगतम्। एतत् श्रुत्वा पिता तं कथयति तर्हि श्रावयतु। सः उच्चस्वरेण पत्रं पठति।)

साठखेड़ाग्रामतः

दिनाङ्कः – 20–6–2006

प्रिय मित्र ! विभो !

सप्रेम नमस्कारः

अहं ग्रीष्मावकाशे स्वग्रामं ह्यः आगतवान्। स्वगृहे स्थित्वा ग्राम्यजीवनस्य आनन्दम् अनुभवामि। प्रार्थयामि यत् भवान् अपि नगरीयकोलाहलात् किञ्चित् कालम् अत्रागत्य पश्यतु ग्राम्यजीवनम्।

मम ग्रामस्य समीपे एव मेलखेड़ा नाम्नि ग्रामे प्रतिमङ्गलवासरे हट्टः भवति। ग्रामं परितः लघु-लघु ग्रामाः सन्ति। तत्रत्याः ग्रामीणाः मित्रैः परिवारैश्च सह हट्टदिने अत्रागच्छन्ति। हट्टस्थानं विस्तृतं रमणीयं चास्ति। अस्मिन् हट्टे जम्बूः, कदम्बः, वटः, पिप्पलस्य च वृक्षाः सन्ति। विक्रेतारः वृक्षच्छायायाम् आपणान् आयोज्य गोधूमान्, चणकान्, यवान्,तण्डुलान्, द्विदलानि इत्यादीनि धान्यानि विक्रीणन्ति। एतद् अतिरिक्तम् अन्येषां वस्तूनाम् अपि विक्रयणम् अत्र भवति। अत्र मोदकम्, कुण्डलीम्, अमृतीम्, रसगोलकम् इत्यादीनि मिष्ठान्नानि च मिलन्ति। मिष्ठान्नानि मह्यं रोचन्ते। शाकानाम्, फलानां चापि अत्र हट्टे विक्रयः भवति। तेषु आलुकम् पलाण्डुः, कूष्माण्डं, शिम्बाम्, मूलिका, कर्कटिकादीनि शाकानि तथा च कदलीफलम्, आम्रम्, खर्जूरादीनि बहूनि फलानि प्राप्नुवन्ति। अत्र लौहकारस्य, कुम्भकारस्य, स्वर्णकारस्य चापि आपणाः भवन्ति। एवं बहवः आपणाः अत्र सन्ति।



अस्य हट्टस्य महत्त्वपूर्णपक्षोऽयं यत् अत्र दूर-दूराद् आगत्य ग्रामीणजना: परस्परं मिलन्ति। ते अत्र संवादं वार्तालापं च कुर्वन्ति। एवं ते परस्परं मिलित्वा सर्वे मुदिता: भवन्ति।

मित्र! त्वम् अत्र अवश्यमेव आगच्छ। अस्तु, पत्रं समापयामि। स्वकीयपितृपादयो: मम प्रणतिं समर्पय। मम गृहे सर्वे कुशलिन: सन्ति।

प्रतीक्षायाम्।

भवदीय:

गिरिराजनायक:

## शब्दार्था:

| | | | | | |
|---|---|---|---|---|---|
| आगत्य | — | आकर | रसगोलकम् | — | रसगुल्ला |
| हट्ट: | — | हाट | अमृती | — | इमरती |
| तत्रत्या: | — | वहाँ के | गोधूमा: | — | गेहूँ |
| परित: | — | चारों ओर | शिम्ब: | — | सेम |
| आपण: | — | दुकान | कूष्माण्ड: | — | कद्दू |
| द्विदलम् | — | दाल | कर्कटिका | — | ककड़ी |
| कुण्डली | — | जलेबी | | | |

## अभ्यास:

1. **एकपदेन उत्तरं लिखत—**

क. ग्रीष्मावकाशे स्वग्रामं क: आगतवान्?

ख. कस्मिन् ग्रामे हट्ट: भवति?

ग. हट्ट: कस्मिन् दिवसे भवति?

घ. विक्रेतार: कुत्र आपणान् आयोजयन्ति?

ङ. हट्टदिने के आगच्छन्ति?

2. **एकवाक्येन उत्तरं लिखत—**

क. ग्रामं परित: के सन्ति?

ख. पञ्चशाकानां नामानि लिखत?

ग. पञ्चानाम् अन्नानां नामानि लिखत?

घ. ग्रामीणा: परस्परं मिलित्वा किं कुर्वन्ति?

ङ. हट्टस्थाने के के वृक्षा: सन्ति?

3. **रिक्तस्थानानि पूरयत—**

क. अहं ग्रीष्मावकाशे .................. आगतवान्।

ख. अत्रागत्य पश्यतु ......................।

ग. ........................ हट्टः भवति।

घ. हट्टस्थानं विस्तृतं रमणीयं ................।

ङ. परस्परं मिलित्वा ..................... मुदिताः भवन्ति।

4. **अर्थानुसारं योजयत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | प्रिय! | – | भवन्ति |
| ख. | आपणाः | – | मित्र! |
| ग. | अत्रागच्छन्ति | – | प्रतिमङ्गलवासरे |
| घ. | हट्टः | – | समर्पय |
| ङ. | प्रणतिं | – | हट्टदिने |

5. **निम्नलिखितपदानां मूलशब्दं विभक्तिं वचनं च लिखत—**

| | पदानि | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| क. | आपणाः | | | |
| ख. | मित्रैः | | | |
| ग. | जीवनस्य | | | |
| घ. | ग्रामे | | | |
| ङ. | मोदकम् | | | |

6. **निम्नाङ्किताव्ययानां वाक्ये प्रयोगं कुरुत—**

**यथा—** तत्र जनाः आगच्छन्ति।

(क) ह्यः (ख) अत्र (ग) च

(घ) अपि (ङ) प्रति

**योग्यताविस्तारः —**

- ग्रामीणजनानां जीवनचर्यां ज्ञात्वा पञ्च वाक्यानि लिखत।
- एकस्य मेलापकस्य वर्णनं कुरुत।
- अवकाशार्थम् अथवा शुल्कमुक्तिहेतोः प्रार्थनापत्रं लिखत।

*न रत्नमन्विष्यति मृग्यते हि तत्।*